संस्कृतभारती samskrita bharati usa




# Samskritam As a Foreign Language (SAFL)

## NEWSLETTER

## APRIL 30, 2020

IN THIS ISSUE

Samskritam As "Family" Language

Important Dates

सुभाषितम्

Articles

# Samskritam As "Family" Language

नमस्सर्वेभ्यः,

With the advent of spring, Hindu new year, and Holi festivities, let us join the celebration by embarking on something new. We all, the students, parents as well as teachers and administration team members of Samskritam As Foreign Language (SAFL) family are fortunate to be in this journey's 11th year. You might have already heard about how it grew from a humble संस्कृतम् ('saṃskṛtam') seed to a वटवृक्षः (vaṭavṛkṣaḥ) that we now know as SAFL.

Now that we are into the next decade, I think it is important that we strive to take it to a new orbit altogether and collectively take a leap towards making Samskritam a *Family* Language. In a child's education, the role of parents/guardians is crucial. Many families within the SAFL community are already involved in Samskritam beyond just classes for high school credits. Those who are learning or contributing either by joining adult classes in a local chapter (संस्कृतकेन्द्रम् saṃskṛtakendram) on weekends, volunteering in बालवर्गाः (bālavargāḥ), doing self-study through Distance Learning Program (DLP) or gaining knowledge from भगवद्गीता bhagavadgītā (or other such शास्त्राभ्यासः śāstrābhyāsaḥ) can certainly vouch for the benefits to their child(ren) enrolled in SAFL.

But there is still scope to bring that number to 100% meaning every SAFL student has at least one adult from their household (if not all) who are part of the 'Speak Samskritam' movement. This movement began four decades ago in Bharatam, and has spread globally with every passing decade. In the United States, Samskrita Bharati has gained enough traction to be celebrating their 25th anniversary in 2020. The motto for this रजतोत्सवः (rajatotsavaḥ) celebration is संस्कृतं सर्वेषां सर्वत्र ('saṃskṛtam sarveṣām sarvatra"). SAFL (as an established successful formal education arm for high school students) has an obligation to be at the forefront of that अभियानम् (abhiyānam).

I am not aware of any other language that needs elaborate formal education for a young one of just one or two years in age, and I think the reason is that 'mother' tongue is the 'family' tongue or the language of conversation in the home. The opportune time has arrived for us to ascend to the next level where we can appreciate the vast repertoire of Samskritam literature, including वाल्मीकि-रामायणम्, गणितशास्त्रम् or आयुर्वेदः (vālmīki-rāmāyaṇam, gaṇitaśāstram or āyurvedaḥ). Neither an overnight change nor changes within a year or so are expected. However, without initiating the small steps no progress can be made. We may have heard the शिबिर-गीतम् (śibira-gītam) this year, अवनितलम् ("avanitalam …") in which we have been reminding each other, कृते प्रयत्ने किं न लभेत, एवं सन्ति विचाराः .. ("kṛte prayatne kiṃ na labheta, evaṃ santi vicārāḥ..")

Samskritam connects us beyond geographical boundaries. In fact, I get reminded of it every week when I join from Canada to connect with students all across various states of the USA and when some of our grader teachers stay connected from भारतम् (bhāratam).

***Deesha Thakkar***
***SAFL Teacher since 2015***
***Math Professor at Sheridan College***
***Mississauga (Canada)***

## IMPORTANT DATES

**Combined Registration for SAFL2020-21 Classes and Online Summer Camps**

**April 15, 2020** - Registration began

**May 7, 2020** - Early Bird Discount Ends

**May 31, 2020** - Registration deadline (May close earlier without notice if classes are full)

**Online Summer Camps**

**June 14 - 20, 2020** – Prajnaa Online Summer Camp

**July 5 - 11, 2020** - Shraddhaa Online Summer Camp

**Online Orientation Class**

**August 22/23/24/25/26, 2020**– Mandatory online orientation for all classes (SAMS100/200/300) during respective class times.

**First Semester - Fall 2020**

**Sept 12 - 16, 2020** – First day of class (All courses)

**Oct 17 - 21, 2020** – Unit Exams – I (100 Level – All Sections)

**Oct 24 - 28, 2020** – Midterm Exams (200 and 300 Levels – All Sections)

**Nov 21 - 25, 2020** – Unit Exams – II (100 Level – All Sections)

**Nov 28 - Dec 2, 2020** – Thanksgiving Break (All courses)

**Dec 19, 2020 - Jan 1, 2021** – Winter Break (All courses)

**Jan 9 - 13, 2021** – Final Exams (All courses)

**Inter semester break**

**Jan 16 - 20, 2021** – Inter semester break. No classes (All courses)

**Second Semester - Spring 2021**

**Jan 23 - 27, 2021** – First day of class

**Feb 27 - Mar 3, 2021** – Unit Exams – I (100 Level – All Sections)

**Mar 13 -17, 2021** – Midterm Exams (200 and 300 Levels – All Sections)

**Apr 10 - Apr 14, 2021** – Unit Exams II- (100 Level – All Sections)

**May 15 - 19, 2021**– Final Exams (All courses)

### REGISTRATION FOR 2020-21

**Registrations for SAFL 2020-21 Academic Year is currently ongoing. Register at safl.sbusa.org**

## सुभाषितम्

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

- सुभाषितरत्नभाण्डागारम्

हे सरस्वति मातः! भवत्या: अयं ज्ञानकोशः अद्भुत: अतुलनीयः च अस्ति । यतः व्ययद्वारा अन्येषां धन-पूर्ण - कोशानां समाप्तिः भवति सङ्ग्रहेण च वृद्धिः भवति । परन्तु व्ययद्वारा भवत्याः अस्य ज्ञानकोशस्य वृद्धिः भवति, सञ्चयद्वारा च एषः कोशः नष्टः भवति ।

Oh! Bharati! (Goddess of Learning!), Your treasury is quite extraordinary; it expands on spending and diminishes on not using it.

Courtesy: Samskrit Tutorial

## Articles

# न रत्नमन्विष्यति मृग्यते हि तत्



Tulasi Gowda(top-L), Mohammad Sharif(top-R), Munna Master(bottom-L), Jagadish Jal Ahuja(bottom-R)

Photo credit - Deccan Herald

एतत् चित्रं पश्यन्तु | एते द्रष्टुं बहुसामान्याः सन्तः असामान्यानि कार्याणि साधितवन्तः | **तुलसीगौडा** - अनक्षरज्ञा वनवासजातीय-महिला पर्यावरणसंरक्षणाय 100,000 सस्यानि आरोप्य पोषितवती; **मोहम्मदशरीफ़्** - गत-पञ्चविंशति-वर्षेभ्यः अनाथ-मृतशवानाम् अन्तिम-संस्कारान् कुर्वन्नस्ति; **मुन्नामास्टेर्** - मोहम्मदीयः सन् हिन्दुभजनानि रचयन् गायति गोसंरक्षणमपि करोति; **जगदीशलाल्अहूजा** - विंशति-वर्षेभ्यः प्रतिदिनं निश्शुल्कं भोजनं (लङ्गर्) निर्धनेभ्यः बुभुक्षितेभ्यः च ददाति |

यथा महाकविकालिदासेन कुमारसम्भवमहाकव्ये उक्तं - *"न रत्नमन्विष्यति मृग्यते हि तत्"* - तथा एतानि रत्नानि अपि भारतीयसर्वकारेण प्रयत्नपूर्वकम् अन्विष्टानि, **"पद्मश्रीः"** इति उच्चतमपुरस्कारेण सम्मानितानि च | कला, शिक्षा, समाजसेवा, वैद्यकीयक्षेत्रं, व्यापारः, क्रीडाक्षेत्रं, विज्ञानं, कृषि, विविधक्षेत्रम् - इति नवविभागेभ्यः चिताः 118 जनाः अस्मिन् वर्षे गणतन्त्रदिनोत्सवस्य अवसरे (26, जनवरी 2020) भारतसर्वकारेण घोषिताः च मार्च्-मासे भारतीयराष्ट्रपतिना पुरस्कृताः च | एतेषु बहवः मौनेन स्वीयक्षेत्रे फलापेक्षां विना कीर्तिकण्डूतिं विना स्वस्य अन्तरङ्गे ज्वलमानदीपेन प्रकाशं प्रसारयन्तः कार्यं कुर्वन्तः आसन् | एतादृशेभ्यः दीपेभ्यः शतकोटिप्रणामाः |

भारतराष्ट्रकवेः रवीन्द्रनाथठाकुर्महाशयस्य वचनानि स्मरेम -*'Let me light my lamp', says the star, And never debate if it will help to remove the darkness - Indian Nobel Laureate Rabindranath Tagore*

*Padmaja Ramadugu*
*SAFL Teacher since 2016*
*Teacher and Entrepreneur*
*Rutherford, NJ*

## अस्माकं संस्कृत्या कोरोना-कीटाणुतः रक्षणं कथम् ?

इदानीं लोके कोरोना-कीटाणुः बहुषु देशेषु अस्ति । लोके कोरोना-कीटाणुतः भीतिः सर्वत्र अस्ति । अस्मिन् समये वयं बहिः गन्तुं न शक्नुमः । कोऽपि कार्यालयं न गच्छति । बालकाः च विद्यालयं न गच्छन्ति । मित्रैः सह मेलनं च न भवति । सर्वे गृहे एव तिष्ठन्ति । गृहे एव स्थित्वा जनाः सङ्गणकैः कार्याणि कुर्वन्ति पठन्ति च । सामाजिक-दूरत्वं सर्वे आचरन्ति ।

एषः कीटाणुः अतीव भयङ्करः अस्ति । वेगेन प्रसरति । एतस्य कीटाणोः प्रसारण-प्रतिबन्धनम् अतिकठिनम् अस्ति । किमपि औषधं नास्ति । बहवः जनाः चिकित्सालयान् गतवन्तः । इदानीं कोरोना-कीटाणुतः जनानां रक्षणं कथं वा भवेत् इत्येव सर्वविश्वव्यापिनी चिन्ता अस्ति। अस्माकं संस्कृतिं पश्यामः । अस्माकं संस्कृतिः बहून् गुणान् पाठयति । अत्र शुचेः नितरां प्राधान्यम् अस्ति । योगसूत्रेषु पतञ्जलि-महर्षिणा उक्तं -

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥२.३२॥ - इति ।

अत्र शुचेः प्राधान्यम् अस्ति । इत्युक्ते शरीरस्य मनसः च शुद्धिः आवश्यकी । यदि नेत्रस्य मुखस्य नासिकायाः वा स्पर्शनं कुर्मः तर्हि झटिति अस्माभिः हस्तप्रक्षालनं करणीयम् । यदा वयं बहिः गत्वा गृहं प्रत्यागच्छामः अस्माकं संस्कृतिः हस्तप्रक्षालनं पादप्रक्षालनं च पाठयति । इदानीं तदेव कृत्वा वयं कोरोना-कीटाणोः प्रसारं स्थगयाम। जनैः सह मेलनसमये वयं हस्त-मेलनस्य अपेक्षया नमस्कारम् एव कुर्मः । एवं करणेन कोरोना-कीटाणुः जनेषु न प्रसरिष्यति ।

भारतीय भोजनम् अत्यन्तं सात्विकम् अस्ति । सात्विक-भोजनं शाकानि रसाः च शरीराय शक्तिम् आरोग्यं च ददति । एवं खादनेन जनाः स्वस्थाः भवन्ति । अस्माकं संस्कृत्यां व्यायामस्य अपि महत्त्वम् अस्ति । योगः प्राणायामः च शरीराय मनसे च शक्तिं दत्तः, रोगक्षमतां वर्धयतः च । एवं कृत्वा वयं कोरोना-कीटाणोः प्रसरणं स्थगयाम ।

*Sneha Vashishta*
*300D*

# अभिमन्युः

पञ्चपाण्डवाः सर्वे महाशूराः इति सर्वे जानन्ति। परन्तु तेषां पुत्राः अपि महान्तः शूराः आसन्। एतेषां पुत्राणां पराक्रमः महाभारतयुद्धे दृश्यते । एतेषु पुत्रेषु अभिमन्युः एव श्रेष्ठः वीरः। एतस्मिन् निबन्धे अहम् अभिमन्योः विषये कथयामि ।

अभिमन्युः चन्द्रस्य पुत्रस्य वर्चसः अवतारः आसीत्। सः तस्य पितरं प्रार्थितवान्: "अहं मनुष्यलोके जन्म प्राप्नोमि किम्?" इति। चन्द्रः अपि अङ्गीकरोति, परन्तु सः वदति, "भवता षोडशवर्षानन्तरं प्रत्यागन्तव्यम् " इति। तस्मात् एव वर्चाः अर्जुनस्य सुभद्रायाः च पुत्ररुपेण अभिमन्यु-नाम्ना जन्म प्राप्तवान् ।

अभिमन्युः बाल्यकाले द्वारकायाम् उषितवान्। कृष्णस्य पुत्रः प्रद्युम्नः तस्य गुरुः आसीत्। तस्य पिता अर्जुनः अपि तस्मै युद्धज्ञानं दत्तवान्। पाण्डवाः अज्ञातवाससमये विराटनामकस्य राज्ञः सभायां कार्यं कृतवन्तः। तस्य विराटराजस्य पुत्री उत्तरा अभिमन्युं परिणेतुम् इष्टवती। पाण्डवाः अपि एषा समीचीना योजना इति चिन्तितवन्तः यतः अभिमन्युः उत्तरां परिणयति चेत् विराटः कुरुक्षेत्रयुद्धे तेषाम् एव साहय्यं करोति इति । अभिमन्युः अपि अङ्गीकृतवान्। तस्मात् तयोः विवाहः अभवत्।

अभिमन्युः कुरुक्षेत्रयुद्धे उत्कृष्टरीत्या युद्धं कृतवान्। सः इन्द्रस्य पौत्रः आसीत् । तस्मात् तस्य शस्त्रज्ञानम् अधिकम् आसीत्। धनुषः उपयोगे तस्य सामर्थ्यम् अर्जुनसदृशम् इति सर्वे जनाः उक्तवन्तः। अभिमन्युः युद्धे बहून् महतः वीरान् जित्वा मारितवान्। सः धैर्येण युद्धं कृतवान्।

कुरुक्षेत्रयुद्धस्य आरम्भे पाण्डवाः कौरवाः च कांश्चन नियमान् अङ्गीकृतवन्तः। परन्तु द्वयोः गणयोः वीराः अपि एतान् नियमान् उल्लङ्घन्ते स्म। उदाहरणार्थं वयं महाभारतयुद्धस्य त्रयोदशं दिनं पश्यामः। तस्मिन् दिने एव अभिमन्युः वीरगतिं प्राप्तवान् ।

युद्धस्य त्रयोदशस्य दिनस्य आरम्भे कौरवाः सेनायाः चक्रव्यूह-रचनां चिन्तितवन्तः। तं चक्रव्यूहं कथं भग्नं करणीयम् इति युधिष्ठिरः न ज्ञातवान् । तस्मात् सः सर्वान् पृष्टवान्। पाण्डवसेनायाम् अर्जुनः कृष्णः अभिमन्युः च इत्येते त्रयः एव चक्रव्यूहः कथं विध्यते इति जानन्ति स्म । परन्तु कौरवाः अपि एतत् जानन्ति। तस्मात् ते एकां गुप्तयोजनां कृतवन्तः। सुशर्मा इति एकः महावीरः अर्जुनेन सह युद्धं कर्तुं द्रोणाचार्येण प्रेषितः आसीत्। यदि सुशर्मा अर्जुनं द्वन्द्वयुद्धार्थम् आह्वयेत् तर्हि क्षत्रियधर्मानुगुणं महारथेन अर्जुनेन तेन सह युद्धं करणीयम् एव भवेत् । श्रीकृष्णः अर्जुनस्य सारथिः। तस्मात् तेन अपि गन्तव्यम् । परेद्युः युद्धभूमौ कौरवाणां योजनानुगुणं सुशर्मा अर्जुनः च युद्धं कुर्वन्तौ दूरं गतवन्तौ । कौरवाणां सेना तु चक्रव्यूह-रचनायाम् आसीत् । युधिष्ठिरः भीतः अभवत्। किं करणीयम् इति सः न ज्ञातवान्। तदा अभिमन्युः उक्तवान्, "मया चक्रव्यूहं कथं विध्येत इति ज्ञायते। अहमेव चक्रव्यूह-भेदं कृत्वा अन्तः प्रविशामि " इति। परन्तु अभिमन्युः चक्रव्यूहात् कथं बहिः आगन्तव्यम् इति न जानाति स्म । तस्मात् अन्ये पाण्डवाः अभिमन्युना सह गच्छन्तु इति योजनां कृतवन्तः। एवं विचिन्त्य ते अन्यां सेनां प्रति गतवन्तः। परन्तु यदा अभिमन्युः कौरवसेनायाः अन्तः गतवान्, तदा कौरवसैनिकाः अन्येभ्यः पाण्डवेभ्यः प्रवेष्टुम् अवसरं न दत्तवन्तः।

तस्मात् अभिमन्युः एकाकी एव शत्रुसेनायाः मध्ये आसीत्। सः शौर्येण युद्धं कृत्वा बहून् बलवतः सैनिकान् मारितवान्। एतत् दृष्ट्वा दुर्योधनः कुपितः अभवत्। तस्य आज्ञया कौरवाः सर्वे अभिमन्युम् आक्रमन्ति स्म। अभिमन्युः आत्मरक्षणं कर्तुं न शक्तवान्। तस्मात् सः मृतः अभवत्। तत्समये तस्य वयः षोडशवर्षात्कम् आसीत्। तस्मात् सः षोडशवर्षानन्तरं पुनः तस्य पित्रा चन्द्रेण सह मिलितवान्।

अभिमन्योः शौर्यं श्लाघनीयम् इति अहं चिन्तयामि। तस्य निःस्वार्थगुणेन एव पाण्डवानां विजयः अभवत्। परन्तु तस्य निर्णयः बहु त्वरितः आसीत्। सर्वे जनाः "कौरवसेनायाः अन्तः मा गच्छ" इति तम् उक्तवन्तः, परन्तु सः न श्रुतवान्। तस्मात् एव तस्य मरणम् अभवत्।

*Ambareesh Shyam Sundar*
*300D*

## SAFL अनुभवः

मम नाम श्रीविद्या। अहं नवम्यां कक्ष्यायां, SAFL 300 वर्गे च पठामि। अहं "SAFL" कार्यक्रमे मम अष्टमे वर्गे प्रविष्टवती। अहं "Direct Entry"-तः SAFL 200 मध्ये आरम्भं अकरवम्। मम प्रथमं प्रज्ञाशिबिरं बहु सम्यक् अभवत्। अहं बहुभिः मित्रैः सह मिलित्वा अनेकान् विषयान् पठितवती ।

SAFL 200 कक्ष्यायाम् लङ् लकारं, लृट् लकारं, विशेषण-विशेष्य-भावं, अकारान्तपदानि, आकारान्तपदानि, इकारान्तपदानि, ईकारान्तपदानि, अन्यान् व्याकरण-विशेष-विषयान् च वयं पठितवन्तः।

पुनः अहं जुलै मासे २०१९ संवत्सरे प्रज्ञा-शिबिरं गतवती। तत्र पुनः अहं मित्रैः सह मिलित्वा अन्यानि संस्कृत-प्रकरणानि - माहेश्वर सूत्राणि, कर्तरि-कर्मणि-भावे-प्रयोगाः इत्यादीन् च पठितवती ।

अहम् इदानीम् SAFL 300 वर्गे हलन्तविभक्तीः , कर्मणि-भावेप्रयोगौ , सङ्ख्याः, बहून् प्रत्ययान् , सन्धीन्, अन्वयक्रमम्, अन्यव्याकरण-विषयान् च पठामि। मम गुरवः मम ज्ञानवर्धनार्थम् अतीव साहाय्यं कुर्वन्ति। प्रश्नाः सन्ति चेत् ते सर्वदा उत्तमरीत्या मम सन्देहनिवारणं कुर्वन्ति ।

अहं SAFL कार्यक्रमेण एव इदानीं सम्यक् संस्कृतम् अवगच्छामि । मम गुरुभ्यः बहवः धन्यवादाः । मम SAFL अनुभवः मनोरञ्जकः आनन्ददायकः च आसीत् ।

*Srividya Ujjini*
*300D*

## SAFL अनन्तरम्

मम नाम महती वेलूरी। इदानीम् अहं SAFL कार्यक्रमस्य तृतीये वर्षे अस्मि। मे मासे SAFL समापयामि । मम SAFL अनुभवः बहु उत्तमः अस्ति। मम भाषणे, पठने, लेखने च वृद्धिः जाता । बहुभिः मित्रैः सह मिलितवती । इदानीम् अहम् अस्माकं संस्कृतिम् अवगच्छामि। सर्वे पुराणाः , इतिहासाः, शास्त्राणि च संस्कृतभाषायामेव लिखिताः इत्यपि अवगतवती ।

SAFL समापनेन संस्कृताध्ययनस्य समापनं न भवति । संस्कृतभाषा सरला, सुन्दरी एव । अहं मित्रैः सह संभाषणं करिष्यामि। अहं, सर्वे छात्राः च संस्कृतस्य सेवां कर्तुं शक्नुमः । अहं बहुवर्षेभ्यः (SAFL पूर्वमपि) संस्कृतं मम प्रादेशिककेन्द्रे पठितवती । अहं मम राज्यस्य संस्कृतकेन्द्रेषु अथवा संस्कृतशिबिरेषु पाठयिष्यामि। उपशिक्षिकारूपेण साहाय्यं करिष्यामि । यथाशक्ति अन्यविषयेषु अपि साहाय्यं करिष्यामि । अहं नूतनछात्रेभ्यः साहाय्यं दास्यामि, ये परीक्षां लेखितुम् इच्छन्ति । मम जनन्या सह संस्कृतभाषायां सम्भाषणं कर्तुं शक्नोमि । अपि च, अहं विश्वविद्यालयस्य वर्षेषु इतोऽपि संस्कृतं पठितुम् इच्छामि । संस्कृतभाषा विशाला अस्ति, विकल्पाः बहवः सन्ति । अहम् अग्रे सम्यक् ज्ञानं प्राप्य अन्यान् ग्रन्थान्, पुराणानि च पठितुम् इच्छामि ।

संस्कृतभाषापठनं महाविद्यालये अथवा विश्वविद्यालये केवलं Credits प्राप्तुम् एव न, आजीवनं करणीयम् इति मम अभिप्रायः ।

जयतु संस्कृतम् ।

*Mahati Veluri*
*300E*

# सत्या भक्तिः

“सत्या भक्ति: का?” इति भवन्तः कदापि चिन्तयन्ति किम्? कथां पठित्वा वयम् इदानीं प्रश्नस्य उत्तरं ज्ञास्यामः। कस्मिंश्चित् नगरे, कश्चित् भागवतकथकः आसीत् । प्रतिदिनं सः एकस्मै धनिककुटुम्बाय भागवतं कथयति स्म । कस्मिंश्चित् दिने गृहात् बहिः कश्चन चोर: कस्यचन वृक्षस्य पृष्ठत: गुप्तरूपेण अतिष्ठत्। चोर: कथाम् अपि अशृणोत् । कथक: तस्मिन् समये कृष्णस्य चौर्यकथां उक्तवान् । तदा चोर: “कथक: मम जीवनस्य विषये वदति वा? मम कर्णयोः विश्वासं न करोमि” इति अचिन्तयत् । किन्तु चोर: “अहो! कथा तु कृष्णस्य चौर्यकार्याणां विषये अस्ति” इति अवगतवान् । सः तदा आश्वासनं प्राप्य विश्रामम् अकरोत् । कथायाः अन्ते चोर: “धनिककुटुम्बस्य आभराणानाम् अपेक्षया कृष्णस्य बहूनि आभरणानि सन्ति” इति परिज्ञातवान् । ततः “इदानीं कृष्णात् अहं चोरयिष्यामि” इति सः चिन्तितवान् । कथक: उपन्यासं समाप्य मार्गे सञ्चरन् आसीत् । तदा चोर: कथकस्य पुरत: आगतवान् । चोर: कथकम् अपृच्छत् “कृष्ण: कुत्र वसति? भवान् न वदिष्यति चेत् अहं भवन्तं मारयिष्यामि” इति। कथक: “कृष्ण: यमुनानद्या: तीरे वृन्दावनग्रामे वसति । स: तस्य भ्रात्रा बलरामेण सह नदीतीरे प्रातःकाले चलिष्यति” इति अवदत् । किन्तु यद्यपि उक्तवान् कथकः तासु कथासु विश्वासं न करोति स्म । परन्तु चोरः एतत् श्रुत्वा वृन्दावनं गतवान् । अहो आश्चर्यम् ! तत्र, तस्य पुरत: साक्षात् देवः कृष्ण: बलरामेण सह आसीत् । चोर: कृष्णाय बलरामाय च तस्य निवेदनं कृतवान् । “अहं एक: चोर: अस्मि । अहं धनिकेभ्यः चोरयामि” इति सः उक्तवान् । किन्तु कृष्ण: “अहं चित्तचोर: अस्मि । अहं हृदयानि चोरयामि” इति उक्तवान् । दर्शनं प्राप्य चोरस्य हृदये तृष्णा उत्पन्ना । कृष्णेन मेलनानन्तरं चोरस्य स्यूत: भारवान् अभवत् । नगरम् आगम्य, चोर: “मम स्यूते बहूनि आभरणानि सन्ति । कथम्?” इति चिन्तितवान् । चिन्तयित्वा कथकस्य समीपं गत्वा तस्मै विषयं निवेदितवान्। कथक: एतत् श्रुत्वा चकितः अभवत् । तौ पुनः कृष्णं बलरामं च द्रष्टुं वृन्दावनं गतवन्तौ । तत्र चोर: पुन: कृष्णं दृष्टवान् किन्तु कथक: न अपश्यत् ।“अहो! अहं कथासु विश्वासं न कृतवान् । तत्कारणेन अहं कृष्णस्य दर्शनं न प्राप्तवान् । चोर: परिपूर्णं विश्वासं करोति ततः सः कृष्णं दृष्टुं शक्नोति । ” इति कथक: ज्ञात्वा रुदितवान्। “अहम् अधुना परिपूर्णविश्वासं करोमि । अहं कृष्णं शरणं प्राप्नोमि” इति उक्त्वा कथक: भूम्यां साष्टाङ्गनमस्कारं कृतवान् । तदा कथक: अपि कृष्णम् अपश्यत् ।
सद्भक्तिः कथम् अस्ति इति वयम् अधुना स्पष्टतया जानीमः ननु? अतः वयं भक्तचोर: इव सत्यभक्तिम् आचराम खलु?
मम नाम मुकिल: अहं California राज्ये निवसामि । अहम् अष्टमवर्गे पठामि । मह्यं संस्कृतं रोचते । मम जननी जनक: भ्राता च अपि संस्कृतं पठन्ति । SAFL कार्यक्रमात् पूर्वम् अहं बालकेन्द्रे पठितवान् । अहम् एतां कथां चिन्मयसंस्थायाः बालविहारे श्रुतवान् ।

*Mukhil Narayanan*
*200G*

# युगादिः

भारतदेशे बहवः उत्सवाः भवन्ति। तेषु अनेकेषु पर्वदिनेषु अन्यतमं पर्वदिनं युगादिः अस्ति। महाराष्ट्रस्य आन्ध्रप्रदेशस्य कर्णाटकस्य तेलङ्गाणाराज्यस्य च जनानां नूतनवर्षस्य आरम्भदिनं युगादिः भवति। एतस्य दिनस्य आचरणं चैत्रमासस्य प्रथमे दिने कुर्वन्ति। अस्माकं पञ्चाङ्गे चैत्रः प्रथमः मासः भवति। ग्रिगोरियन् दिनसूच्यां युगादिः मार्च् अथवा एप्रिल् मासे भवति। चान्द्रमानपञ्चाङ्गे युगादिः शुक्लप्रथमदिने भवति। अतः एतम् उत्सवं चान्द्रमानयुगादिः इति वयं वदामः। युगादिपर्वदिनस्य आरम्भः कलियुगे अभवत् इति वयं गणयामः। श्रीकृष्णस्य मरणस्य अनन्तरं कलियुगस्य आरम्भः अभवत्। एतत् शुभदिनं ब्रह्मदेवेन सह सम्बन्धितं अस्ति। ब्रह्मदेवः अस्माकं ब्रह्माण्डं निर्मितवान्।

यतः युगादिः वसन्तकालस्य प्रारम्भं सूचयति अतः आरोग्यवतः धनवतः नूतनस्य वर्षस्य आरम्भं सूचयति। भारतदेशे जनाः स्नानं कृत्वा एतस्य शुभदिनस्य आरम्भं कुर्वन्ति। आम्रपत्राणां तोरणेन गृहस्य द्वारे अलङ्कारं कुर्वन्ति कार्तिकेयस्य विनायकस्य च प्रीत्यर्थम्। तेषां गृहस्य पुरतः रङ्गवल्लीं रचयन्ति। एतत् आचरणम् अतिमुख्यं भवति। अन्यत् आचरणम् अस्ति पञ्चाङ्गश्रवणम्। एतस्मिन् अवसरे पण्डिताः पञ्चाङ्गं श्रावयन्ति अपि च जनानां वार्षिकराशिफलानि गणयन्ति। एतस्मिन् दिने कविसम्मेलनानि भवन्ति। तत्र साहित्यविषये सङ्गीतविषये च चर्चाः भवन्ति। कविताः अपि श्राविताः भवन्ति । विशेषम् अवलेहं कुर्वन्ति। एतस्मिन् अवलेहे षट् रुचयः भवन्ति। एतेषां पदार्थानां प्रयोगः भवति - लवणं गुडः तिन्त्रिणी निम्बपुष्पाणि आम्रं मरिचचूर्णः च। प्रत्येकं रुचिः अस्माकं जीवने एकम् अंशं सूचयति।

अस्माकं गृहे मम कुटुम्बः एतस्य दिनस्य आरम्भं मङ्गलस्नानेन पूजया च करोति। अवलेहं कृत्वा देवाय अर्पणं कृत्वा किञ्चित् वयं सर्वे स्वीकुर्मः। तदनन्तरं वयं रुचिकरं भोजनं खादामः। मम जननी अनेकानि भक्ष्याणि सम्यक् पचति। यतः मम जनन्याः मातृभाषा तमिल् मम जनकस्य मातृभाषा च तेलुगू अस्ति वयं सौरमानं चान्द्रमानं च पञ्चाङ्गे आचरामः। अतः एकसप्ताहस्य अनन्तरं सौरमानयुगागदिम् अपि आचरामः। अहम् एतम् उत्सवं बहु इच्छामि यतः एतस्मिन् अवसरे कुटुम्बेन सह सन्तोषेन समयं यापयामि।

*Urmika Prakhya*
*200A*

## नदीसंरक्षणम्

नदी अस्माकं नित्यजीवनाय अत्यावश्यकी। भारतदेशे विविधाः नद्यः सन्ति - उत्तरभारते गङ्गा , यमुना , ब्रह्मपुत्रः, नर्मदा इत्यादयः सन्ति। दक्षिणभारते कावेरी, गोदावरी, तुङ्गभद्रा इत्यादयः सन्ति । सर्वाः नद्यः शुद्धाः आसन् परन्तु मनुष्यस्य अनवधान-कारणतः नद्यः अशुद्धाः अभवन् |

अद्य अहं यमुनानद्याः विषये किञ्चित् वदामि | यमुनानदी भारतदेशस्य पवित्रा नदी अस्ति | यमुनानदी उत्तरखण्डे यमुनोत्रीतः प्रवहति | यमुनोत्रीतः आरभ्य देहल्यां, हरियाणायां, उत्तरप्रदेशस्य अनेकेषु नगरेषु च प्रवह्य प्रयागराज-नगरे गङ्गानद्या सह योजिता भवति | यमुनानदी बहु पवित्रा अस्ति, अतः यात्रिकाः अनेकेभ्यः प्रदेशेभ्यः आगत्य यमुनातीरे पूजां कुर्वन्ति |

दौर्भाग्यवशात् यमुना प्रदूषणेन पीडिता अभवत् | एतस्य मुख्यकारणम् औद्योगिकसंस्थाभिः जनितं प्रदूषणम् एव ! एतस्य प्रदूषणस्य निवारणार्थं भारतीयसर्वकारः निरन्तरं कार्यं करोति | शीघ्रमेव यमुनानदी पुनः शुद्धा नदी भविष्यति इति अहम् आशां करोमि| यदि वयम् अपि नदीषु अवकरं न क्षिपामः नद्यः मलिनाः न भवन्ति|

भारतस्य पवित्राणां नदीनां रक्षणम् अस्माकं कर्तव्यम् अस्ति| यमुनायाः अथवा अन्यनदीनां शुद्धजलम् आवश्यकं चेत् आगच्छन्तु, वयं सर्वे मिलित्वा नदी-संरक्षणं कुर्मः| अद्य प्रतिज्ञां स्वीकुर्मः यत् अस्माकं भारतस्य अमूल्यरत्नानां परिरक्षणं कुर्मः इति|

*Adinarayanan Padmanabhan*
*100 H*

## कलहं विना जीवनं वरम्

एकस्मिन् वने एकः विचित्रः वामनः वृक्षः अस्ति। वृक्षे एकं नारङ्गफलम्, एकं सेवफलम्, एकम् आम्रफलम् च वसन्ति। किन्तु फलानि सर्वदा कलहं कर्तुम् इच्छन्ति।

एकदा एकः बालकः जनकेन सह वनम् आगच्छति। बालकः वनं गत्वा, सर्वान् वृक्षान् पश्यति। विचित्रवृक्षस्य समीपम् आगत्य जनकः वदति "पुत्र, भवान् कीदृशं वृक्षम् इच्छति" इति | जनकं दृष्ट्वा "जनक, अहं तादृशं वृक्षं इच्छामि यत्र त्रीणि भिन्नानि फलानि सन्ति" इति बालकः वदति। जनकः पुनः "वृक्षे भवान् कीदृशं फलम् इच्छति?" इति वदति | बालकः एकं फलं स्वीकर्तुं प्रयत्नं करोति |

परन्तु विमूढानि फलानि पुनः कलहं कुर्वन्ति | "सेवफलस्य अपेक्षया अहं मधुरम् अस्मि, अतः मां स्वीकुरु", इति नारङ्गफलं वदति। "न न न! अहमेव बहु मधुरम् अस्मि, अतः मां स्वीकरोतु" इति आम्रफलं वदति। "नारङ्गफलम् आम्लमस्ति, अहमेव मधुरमस्मि, अतः मां स्वीकुरु" इति सेवफलं वदति।

फलानि एवं यदा कलहं कुर्वन्ति, बालकः त्रीणि फलानि अपि स्वीकरोति। "जनकः,अहं त्रीणि फलानि खादितुम् इच्छामि", इति बालकः वदति। यदा बालकः गृहं गच्छति, तदा त्रीणि फलानि खादति।

कलहं कुर्मः चेत् सर्वेषां कृते हानिः एव खलु !! कलहं विना जीवनं वरम् !!

*Samyuktha Talagadadeevi*
*100F*

# गुप्तपदं किम्?

कश्चित् पुरुषः कार्यं कर्तुं भोजनालयं (Cafe) गतवान् | तत्र सः अन्तर्जालस्य गुप्तपदम् इष्टवान् | अतः एषः भोजकं पृष्टवान् "हे भोजक | अन्तर्जालस्य गुप्तपदं किम्?" इति | भोजकः उक्तवान् "किमपि क्रीत्वा पृच्छतु" इति | पुरुषः चिन्तितवान् "अहं क्रेतुं न इच्छामि किन्तु अहं किमपि क्रीणामि चेत् एव अहम् अन्तर्जालस्य गुप्तपदं ज्ञात्वा कार्यं कर्तुं शक्नोमि " |

अनन्तरम् एषः भोजकम् उक्तवान्, "अस्तु, अहं तादृश-काफीपानम् इच्छामि" इति | भोजकः काफीपानं पुरुषाय ददाति | पुरुषः काफीपानं पीत्वा भोजकं पृच्छति "भोः अधुना कृपया अन्तर्जालस्य गुप्तपदं वदतु | अहं कार्यं कर्तुम् इच्छामि | यदि भवान् वदति तर्हि एव अहं कार्यं कर्तुं शक्नोमि "|

भोजकः वदति "अस्तु, अहं वदामि किन्तु एका प्रार्थना अस्ति | कृपया भवान् कुपितः मा भवतु |" पुरुषः वदति "अस्तु,अहं कुपितः न भवामि किन्तु शीघ्रं वदतु | यावत् समयः गच्छति तावत् मम प्रबन्धकः कुपितः भविष्यति |"

भोजकः वदति, ""**किमपि क्रीत्वा पृच्छतु**" | एतदेव गुप्तपदम् अस्ति" इति !!

*Parth Parikh*
*100F*

## Learning about *Yoga*
## Part 2: Different paths

(Continued from SAFL Newsletter Fall 2019)

In the previous article we learned that *yoga* is stopping the natural tendencies of the mind. There are four major paths to achieve this. They are *jnana yoga, karma yoga, raja yoga, and bhakti yoga*.

*Jnana yoga*- In this path, one uses the complete intellectual capacity to understand the characteristics of the world and oneself. One questions everything to understand the true nature of every perceivable object to prevent distractions and illusions.

*Bhakti yoga*- I would say this is the complement of *jnana yoga*. Here, the emphasis is on emotional connectedness with complete faith in the infinite. This complete trust and faith are supposed to lead to Self-realization. This is the most popular form of *yoga* and supposedly the easiest.

*Karma yoga*- While *jnana* and *bhakti yoga* dealt with the opposite states of the mind, *karma yoga* is about committing to actions that serve. Here, one uses the physical body to completely dedicate to duties and professions to such an extent that, there is no room for distractions. Irrespective of your profession like a hunter, engineer, doctor, or teacher, etc., if your work is done with dedication with no expectation of the fruits thereof, it is assumed that one is progressing in *karma yoga*.

*Raja yoga*-This is complementary to *Karma yoga*. This focuses on the 'self'. Here, one completely rules and controls his or her physical body and *indriyas* (senses) like a king, through the various focused practices including meditation. This ensures that a person no longer gets distracted by any enticements of the *indriyas*. Patanjali's *yoga sutras* are considered to focus on this path.

These paths could be chosen based on different parameters

**Stage of life:**

- As a student, a questioning mind can benefit from *jnana yoga*
- As an adult, focus on occupation and work *is karma yoga*
- In middle age, *raja yoga* can help start the detachment process
- In old age, *bhakti* can help surrender to the Infinite

**Daily life:**

- An alert mind in the morning can benefit from *raja/jnana yoga*
- Activities during the day are part of *karma yoga*
- Exhaustion by evening can help surrender to *bhakti yoga*

**Personality type:**

- *Jnana yoga* can help a questioning and a curious personality
- An active and hardworking personality will benefit from *karma yoga*
- A trusting and mellow mind will melt in *bhakti yoga*
- A reflective personality will benefit from *raja yoga*

**Freeform:**

There can be many other dimensions and factors that could influence the choice of the path and there can be more paths based on multiple combinations. *Bhagavad Gita* has 18 chapters that have varying levels of focus on the four main paths postulated. The greatness of our culture is the freedom we have in choosing a path or a custom-made combination of paths that suits oneself to reach Self-realization.

*Prajval Sharma*
*200D*

## Mahākavi Kālidāsa

There are many great writers and poets in Samskritam literature. They all have written many great works and are still revered and looked up to this day. Kālidāsa is one such writer who is one of the most well-known Samskritam poets. He wrote many works, such as *Abhijnaanashaakuntalam* and *Meghadootam*. Many of Kālidāsa's works contain general moral values as well as role-based ones shown by his characters. Kālidāsa was a great Samskritam scholar who is to be looked up to and remembered for ages to come.

The exact birthdate or birthplace of Kālidāsa is unknown. However, scholars have inferred that he was born somewhere near the Himalayas and then moved southwards to Ujjain, where he lived for most of his life. Many people also believe that Kālidāsa was initially dull-witted and foolish. However, when he was married to Princess Vidhyottama through a conspiracy, she inspired him to gain knowledge. Many believe that he earned the name Kālidāsa as he prayed to Mother Kali before acquiring his immense knowledge. From there, he went on to become a well-renowned literary scholar par excellence.

Kālidāsa wrote many works of literature such as *Raghuvamsam*, *Abhijnaanashaakuntalam, Kumaarasambhavam, and Vikramorvashiiyam*. These four works revolve around stories from the *Puranas, Upanishads, and Itihasas* and are written in poetic fashion. Raghuvamsa is a story that depicts the life of great ancestors of Shree Rama, who ruled over Ayodhya, such as Raghu, Bhagiratha, and the other great kings. Abhijnaanashaakuntalam tells the story of Shakuntala and King Dushyant, the parents of King Bharatha, who ruled over Hastinapura and was the great-grandfather of the Kauravas and Pandavas. The story is set as a love story but talks about the duty of a king, and the way nature should be preserved, along with other rules that everyone should follow. *Kumaarasambhavam* tells the story of the marriage of Lord Shiva and Devi Parvati. It leads up to the wedding of Siva and Parvati but does not talk about the actual birth of Shanmukha who killed the demon Tarakasura. Finally, *Vikramorvashiiyam* tells the love story of King Pururavas and the *apsaras* Urvashi. His other works include *Malavikagnimitram* and *Meghadootam*. Malavikagnimitram is the love story of King Agnimitra and an exiled servant named Malavika. The play tells the story of their love, the queen's jealousy, and the final realization that Malavika was indeed a princess. In Meghadoota, an exiled *Yaksha* sends a message to his wife in Alaka in Mount Kailasa describing the many sites he sees in Central India. These are the most famous works of *Mahakavi* Kālidāsa; although, he wrote countless other poems.

Kālidāsa is seen as a very important figure in Samskritam literature due to his literary works and his expansion of grammar and poetic meters. His writing reflects traditional stories of Hinduism recast in a more expressive and poignant style than that found in the Puranas. His literary contributions have added greatly to the rich and voluminous body of Samskritam literature. Kālidāsa is undoubtedly one of the most significant contributors to Samskritam literature.

*Sumedha Surubhotla*
*Class: 202 H*

## The Power of Samskritam

Since its creation, Samskritam has encompassed the power of healing and knowledge. Chanting Samskritam *mantras* restores balance in the mind and body. Moreover, Samskritam is also a highly scientific language which improves knowledge capacity, memory retention, and cognitive abilities. All these effects of the ancient Samskritam language narrow down to its power of healing and wisdom.

Most people know that Samskritam *mantras* have healing powers but are unaware of the process. Chanting the mantras clears the mind and the body through the vibrations created by the 48 phonemes. One well known *dhvani* (sound) created by three phonemes, is ॐ. Pronouncing ॐ clears the sinuses, relaxes the cells, improves the thyroid, cleanses the skin, and strengthens the spinal cord. Moreover, when ॐ is spoken and the focus is on the pineal gland - also known as the third eye - the eyesight improves. Chanting ॐ also relaxes the mind, thus reducing the body's need for sleep. Furthermore, the meaning behind Samskritam *mantras* give scholars a greater understanding of the universe; the sounds of Samskritam are healing but comprehending the significance of the words spoken confers far more प्रज्ञा (wisdom).

The great Samskritam grammarian पाणिनि [pANini] created the concept of a technical metalanguage while compiling the grammar of Samskritam over 2400 years ago. Many claim Samskritam to be a scientific language because of the principles and structures used in its grammar. Samskritam also emphasizes on precision and brevity. Its word generation capability is enormous. The study of Samskritam and its grammar by the west gave rise to the field of linguistics. A lot of sacred, scientific and philosophical work in India happened using it. Samskritam also improves the knowledge of those who have learned and constantly employ it. Dr. Hartzell, a postdoctoral researcher at the Basque Centre on Cognition, conducted a study analyzing the brain development of 21 control subjects and Samskritam scholars. He discovered that the right hippocampus of the scholars contained 10% more grey matter than the control subjects. This increase in grey matter meant that the scholars had enhanced memory and cognitive capabilities.

Samskritam has influenced a great number of lives, including those who speak it and those who may not know the language well. Scholars who have memorized mantras have greater memory retention due to the effects of Samskritam on the brain. Overall, Samskritam enhances health and knowledge, and the meanings of mantras are heavily imbued with wisdom. असतो मा सद्गमय | तमसो मा ज्योषतगवमय | मृत्योमाव अमृतं गमय |(Brihadaranyaka Upanishad).

*Shivani Kedila*
*100J*

## My Experience in the SAFL Program

Namaste! My name is Rishab Sai. Being a first year SAFL student, I really feel proud and grateful for this opportunity to learn Samskritam. Prior to the SAFL enrollment, I knew some Samskritam, and did some basic learning at my local temple. Samskritam, being a very old and ancient language, fascinates me. I am excited to learn about it as it serves as a bridge between me and my culture, and learning it is a spiritual experience. I am gaining more knowledge as I learn new essential topics each week. Some of the interesting topics in this enriching program are reading and writing Samskritam, speaking Samskritam fluently, and acquiring knowledge about Samskritam grammar.

One of the most memorable experiences was the Shraddhaa shibiram (camp). This was my first real stay away from my family. The events and things that I found most compelling were the bhAShAkrIDA, which were language games that we would play to test our knowledge. This enabled us to remember and practice the topics we learned. The other thing I found fascinating were the skits. In this event, people in their specific ganaH, or group, had to come up with a skit in Samskritam, and present it on the stage. Not only were they full of humor, but also tested how much knowledge of Samskritam we had acquired. These two events were enjoyable and provided a fun-filled experience for all new students who attended this camp. Overall, I would like to say that this program was an enriching and nourishing experience that I will cherish forever. Given the opportunity, after graduation, I would like to give back to the program by helping future SAFL students with the Samskritam skills I have learned.

**dhanyavAdaH to all my SAFL teachers and all the SAFL coordinators!**

*Rishab Sai*
*102E*

# Newsletter

SAFL

Samskrita Bharati

2068 Walsh Avenue, Suite B2,
Santa Clara CA 95050

**Contact:**
**safl.samskritabharatiusa.org**
**safl@samskritabharatiusa.org**
**408 752 2182**